K. Krishna Prasad Bhat
Website: http://homas.in
Email: homasonline@gmail.com
Mobil: 8000858858 /9940406777

# ॥ अनुबन्धः ॥

अथ प्रपञ्चसारसारसंग्रहोक्तमन्त्रप्रसङ्गात् अन्येपि केचिन्मन्त्रा लिख्यन्ते–

गृत्समद ऋषिः। त्रिष्टुप् छन्दः। रुद्रो देवता। मात्वारुद्रचुक्रुधा-मानमोभिः इति ऋक् ज्वरशान्तिकरी ॥

मेधातिथि मेध्यातिथी ऋषी। बृहती छन्दः। मघवान् देवता। यद्दतेचिदभिश्लिषः पुरा इत्यृक् समाधान (सन्धि) करी ॥

वसिष्ठ ऋषिः। निचृदनुष्टुप् छन्दः। विश्वेदेवा देवता। हस्ताभ्यां दशशाखाभ्याम्। इति ऋक् जिह्वादोषशान्तिकरी ॥

विश्वामित्र ऋषिः। त्रिष्टुप् छन्दः। अग्निर्देवता। इळामग्ने पुरुदंसं सनिंगो। इति ऋक् सुपुत्रत्वार्थम् ॥

*परुच्छेप ऋषिः। गायत्री छन्दः। इन्द्रो देवता। पिशङ्गभृष्टि-मम्भृणं पिशाचिमिन्द्रसंमृण। इति ऋक् रक्षाकरी ॥

पवित्र ऋषिः। वसिष्ठो वा उभावपि वा। गायत्री छन्दः। पवमानो देवता। यदन्ति यच्च दूरके। इति ऋक् उपद्रवशान्तिकरी ॥

यक्ष्मनाशन ऋषिः। त्रिष्टुप् छन्दः। इन्द्रो देवता। यदि क्षितायु-र्यदिवापरेतो यदि इति ऋक् आयुष्करी ॥

भरद्वाज ऋषिः। गायत्री छन्दः। पूषा देवता। परिपूषा परस्तात् हस्तं दधातु। इति ऋक् स्वहस्तद्वयं परितो बद्ध्वा जपेत्। तस्माच्चोरमपि तथा बद्ध्वा नष्टद्रव्यसिद्धिः ॥

मन्यु ऋषिः। जगती छन्दः। मन्युवरुणौ देवते। संसृष्टं धनमुभयं समाकृतम्। इति ऋक् शत्रुपलायनार्थम्। युद्धादिषु विशेषतस्समीचीनेयम्।

* परुच्छेप इति ख पाठः।

नेम ऋषिः । त्रिष्टुप् छन्दः । वाग्देवता । यद्वाग्वदन्त्यविचेतनानि । इति ऋक् वागीश्वरीप्रसादार्थम् ॥

नेम ऋषिः । त्रिष्टुप् छन्दः । वाग्देवी देवता । देवीं वाचमजनयन्त देवाः इति ऋक् वाक्सिद्ध्यर्थम् ॥

गृत्समदऋषिः । अनुष्टुप्छन्दः । सरस्वती देवता ॥ अम्बितमे नदितमे देवितमे सरस्वती ॥ इति ऋक् विद्यासिद्धिद्वारा प्रसिध्यर्थम् ॥

गौरीवीति ऋषिः । त्रिष्टुप् छन्दः । इन्द्रो देवता । वयस्सुपर्णा उपसेदुरिन्द्रम् इति ऋक् दक्षिणनयनस्थरोगनिवृत्त्यर्थम् ॥

नारायण ऋषिः । अनुष्टुप् छन्दः । पुरुषो देवता । चन्द्रमा मनसो जातः । इति ऋक् वामनयनस्थरोगनिवृत्त्यर्थम् ॥

*मल ऋषिः । गायत्री छन्दः । वायुर्देवता । आवात वाहि भेषजम् । इति ऋक् वातरोगनिवृत्त्यर्थम् ॥

कण्व ऋषिः । अनुष्टुप् छन्दः । शम्भुर्देवता ।

ध्यानम् —

चन्द्रार्धमौळिं कालारिं व्याळयज्ञोपवीतिनम् ।
ज्वलत्पावकसंकाशं ध्यायेद्देवं त्रिलोचनम् ॥

अध्यवोचदधिवक्ता । इति ऋक् विषज्वरग्रहशूलाद्यखिलपीडां नाशयेत् ।

विश्वामित्र ऋषिः । त्रिष्टुप् छन्दः । इन्द्रो देवता । किं ते कृण्वन्ति कीकटेषु गावो । इति ऋक् (चं) धनार्थी दातुर्निकटे स्थित्वा जपेत् । स सर्वस्वमपि ददाति ॥

---

* उल ऋषिः इति ख ग मातृकापाठः ।

भारद्वाज ऋषिः । गायत्री छन्दः । रात्रिर्देवता । रात्रीव्यख्यदायती पुरुत्रा देव्यक्षभिः । इत्यादिसूक्तं रात्रौ जपेत् । ज्वरादिशान्तिकरम् ॥

कुबेर ऋषिः । अनुष्टुप् छन्दः । कुबेररुद्रो देवता ॥

ध्यानम् —

अश्वारूढं कुन्तपाणिं कुबेरं चित्रिणीप्रियम् ।
*धनदे (दं) स्वर्णवर्णं तं वन्दे गन्धर्वनायकम् ॥

कुबेरं ते मुखं रौद्रं नन्दिमानन्दिमावह ।
ज्वरं मृत्युभयं घोरं ज्वरं नाशय मे ज्वर ॥

इति मन्त्रः । अनेन ज्वरादिनिवृत्तिः ॥

बार्हस्पत्यो भरद्वाज ऋषिः । देवीगायत्री छन्दः । पूषा देवता । अदित्सन्तंचिदाघृणे । पणादायार्थे ॥

गौतम ऋषिः । गायत्री छन्दः । सूर्यो देवता । अस्माकमुत्तमं कृधि इति ऋक् अधस्सपत्ना मे इत्यर्धर्चं मध्ये संयोज्यात्मकीर्त्यर्थं च शत्रुपराजयार्थं च वादिप्रतिवादिनोर्विवादे प्रतिवादिनः पराजयत्वेन वादिनो जयार्थं च युद्धादिषु जयार्थं च जपेत् ॥

विहव्य ऋषिः । त्रिष्टुप् छन्दः । अग्निर्देवता । अग्ने मन्युं प्रतिनुदन्परेषाम् । इति ऋचं शत्रोः पराजयार्थं च युद्धादिजयार्थं च जपेत् ॥

मारुतमसि मरुतामोजोपां धाराम् । इत्यनुवाकचतुष्टयं वृष्ट्यर्थं जपेत् ॥

समुद्रं गच्छस्वेत्यनुवाकं वृष्टिनिवारणार्थम् ॥

विभूरसि प्रवाहणो रौद्रेणानीकेन पाहि माग्ने पिपृहि मा मा हिंसीः वह्निरसि हव्यवाहनः रौद्रेणानीकेन इत्यादि, श्वात्रोसि प्रचेताः रौद्रेण

---

* धनेशं इति ख पाठः

इत्यादि, तुथोसि विश्ववेदाः रौद्रेण इत्यादि, उशिगसि कविः, अङ्घारिरसि बम्भारिः, अवस्युरसि दुवस्वान्, शुन्धूरसि मार्जालीयः, संराडसि कृशानुः, परिषद्योसि पवमानः, प्रतक्वासि नभस्स्वान् इत्येवं क्रमेण वाक्यानि छित्वा प्रतिवाक्यं रौद्रेणेत्यादि संयोज्य जपेत्। अतीव रक्षाकरम्॥

गर्ग ऋषिः। त्रिष्टुप् छन्दः। पूर्वार्धस्य रथदुन्दुभिः उत्तरार्धस्यइन्द्रो देवता। आमूरजप्रत्यावर्तयेमाः। इत्यृचं युद्धादिषु जयार्थं च जपेत्॥

ध्रुव ऋषिः। अनुष्टुप् छन्दः। राज्ञी देवता। आत्वा हार्षमन्तरेधि ध्रुवस्तिष्ठाऽविचाचलिः। इत्यृचं राज्यप्राप्त्यर्थंच राज्ञस्तु इतरजनवश्यार्थं च जपेत्॥

भृगु ऋषिः। अनुष्टुप् छन्दः। आपो देवता। आनिवर्तन वर्तय निनिवर्तनवर्तय। इत्यृचं देशान्तरादिषु गतान् ततो निवर्तयित्वा आनेतुं तद्दिङ्मुखो भूत्वा जपेत्॥

प्रणव व्याहृति प्रासाद मृत्युञ्जय त्र्यम्बक मृत्युञ्जय प्रासाद व्याहृति प्रणव क्रमेण मृतसंजीवनीमन्त्रः॥

ह्रीमादि, ध्रुवासुत्वा हुनेन्मन्त्रं जपेन्मन्त्रयुतं पुनः। शृङ्खलादि-बन्धनान्मुच्यते सद्यो नारीवापि नरोपि वा॥

अस्य ध्यानम्—

उत्तप्तहेमरुचिरे त्रिपुरे पुनीहि
चेतश्चिरन्तनमघौघवनं लुनीहि।
कारागृहे निगळबन्धनयन्त्रितस्य
त्वत्संस्मृतौ झटिति मे निगळा गळन्ति॥

एवं ध्यात्वा *ध्रुवासुत्वा सुक्षितिषु इत्याद्यृचा द्रव्यानुक्ते घृतमिति न्यायात् घृतेन हुत्वा राजमन्दिरादिषु निगळबन्धनान्निवृत्तिर्भवेत्॥

*ओ ह्रूं दुं इति ख मातृकायां मूलतया योजितः पाठः।

यो देवानां प्रथमं पुरस्तात् इति ऋक्। अनया ऋचा शुभा मतिर्जायते ॥

अगस्त्य ऋषिः। त्रिष्टुप् छन्दः। अग्निर्देवता। अग्ने नय सुपथा राये अस्मान्। इति ऋक्। सन्मार्गगत्यर्थम् ॥

गृत्समद ऋषिः। त्रिष्टुप् छन्दः। बृहस्पतिर्देवता। बृहस्पते अतियदर्यो अर्हात्। इति ऋचं निगळबन्धनात् मोचनार्थं जपेत्॥

गर्भोपनिषदं सन्तानार्थं जपेत्।

इषेत्वोर्जेत्वा वायवस्थो। इत्यनुवाकं गोरक्षार्थं जपेत् ॥

इन्द्रस्य क्रोडोदित्यै पाजस्यं दिशां। इत्यनुवाकं उदरस्थ गुरुभक्तादि-जीर्णार्थं जपेत् ॥

ऐन्द्रं पञ्चशरा इति सूक्तं वृष्ट्यर्थं जपेत्।

वामदेवाय नमो ज्येष्ठायेति (ऋचं) पिशाचनिवृत्त्यर्थं जपेत् ॥

दंष्ट्राभ्यां मलिम्लूं जंभैस्तस्करां उत। इत्यृचं चोरोपद्रवनाशनार्थं जपेत्॥

नमो अस्तु सर्पेभ्यो ये के च पृथिवीमनु। इति सूक्तं सर्पाद्रक्षणार्थं जपेत् ॥

लाङ्गलं पवीरं वसुशेवं। इत्यृचं कृपिफलनार्थं जपेत् ॥

संपत्नीपत्न्याहं गच्छेसमात्मा। इत्यर्धर्चं पत्नीवश्यार्थं जपेत् ॥

गृत्समद ऋषिः। जगती छन्दः। ब्रह्मणस्पतिर्देवता। गणानां त्वा गणपतिं। इत्यृचं गजलाभार्थं जपेत् ॥